संस्कृत-वार्ता:

25.05.2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

- लोकसभानिर्वाचनस्य षष्ठचरणीयमतदानम् अद्य सम्पन्नम्। एतस्मिन् चरणे षड् राज्यानां द्वयो: केन्द्रशासितप्रदेशयो: अष्टपञ्चाशदासनेभ्य: मतदानम् सञ्जातम्।
- ओडिसाविधानसभाया: द्विचत्वारिंशदासनेभ्य: मतदानमपि तृतीये चरणेऽस्मिन् समनुष्ठितम् ।
- सामान्यनिर्वाचनस्य सप्तमान्तिमचरणाय प्रचाराभियानं नैरन्तर्येण प्रवर्धते।
- 'रेमल' इति नामधेयकस्य चक्रवातस्य बांग्लादेश-पश्चिम-बंगालस्य तटीय-क्षेत्रे श्व: मध्य-रात्रिं यावत् भीषणं रूपधारणस्य संभावना वर्तते।
- दक्षिण-कोरिया-देशे धनुर्विद्या-विश्व-चषक-प्रतियोगिताया: द्वितीय-चरणे भारतीय-महिला-दलेन स्वर्ण-पदकं विजितम्।

<u>निर्वाचनम्</u>

लोकसभानिर्वाचनस्य षष्ठचरणीयमतदानम् अद्य सम्पन्नम्। एतस्मिन् चरणे षड् राज्यानां द्वयो: केन्द्रशासितप्रदेशयो: अष्टपञ्चाशदासनेभ्य: मतदानम् सञ्जातम्। अस्मिन् चरणे बिहारस्य अष्ट, हरियाणाया: सर्वाणि दश, जम्मूकश्मीरस्य एकम्, झारखण्डस्य चत्वारि, देहल्या: सर्वाणि सप्त, ओडिसाया: षट्, उत्तरप्रदेशस्य चतुर्दश, पश्चिमबंगालस्य अष्ट, आसनानि सम्मिलितानि सन्ति। मतदानम् प्रात: सप्तवादनत: समारभ्य सायं षड्वादनम् प्रचलितम्। मध्याह्ने त्रिवादनं यावत् नवचत्वारिंशत् मतदातार: मतदानाभ्यासं कृतवन्त:। अस्मिन् चरणे आहत्य नवाशीत्यधिकाष्टशतं प्रत्याशिन: समराङ्गणे सन्ति। येषां प्रमुख-प्रत्याशिनां भाग्यनिर्णयो भविष्यति तेषु वरिष्ठभाजपानेता मेनकागांधी मनोहरलालखट्टर: मनोजतिवारी कांग्रेसनेतार: दीपेन्द्रसिंहहुड्डा कुमारी शैलजा राजबब्बर कन्हैयाकुमारो वर्तन्ते। एतदतिरिच्य ओडिसाविधानसभाया: द्विचत्वारिंशदासनेभ्य: मतदानमपि अस्मिन्नेवचरणे भवति। वरिष्ठकांग्रेसनेत्री सोनियागांधी राहुलगांधी प्रियङ्कागांधी केन्द्रीयमन्त्री डॉ. एस.जयशंकर: हरदीपपुरी दिल्ल्याश्च मन्त्री आपनेत्री च आतिशी च दिल्ल्या: विभिन्नेषु मतदातृ-केन्द्रेषु स्वीय-मताधिकारस्य प्रयोगं कृतवन्त।

उपराष्ट्रपति: जगदीप-धनखड: प्रोक्तवान् यत् मतदानं कर्तव्यं शक्तिरपि वर्तते। मतदानान्तरं अद्य नवदिल्ल्यां वार्ताहरान् अभिभाषयता उपराष्ट्रपतिना कथितं यत् भारतं विश्वस्य अतिजीवन्त-क्रियाशीलप्रभावि लोकतंत्रदेशो वर्तते। मुख्य-निर्वाचना-युक्तेन राजीवकुमारेण विनिवेदितं यत् लोकतन्त्रस्य अस्मिन् पर्वणि सर्वे मतदातार: मतदानं कुर्यु:। लोकसभा-निर्वाचनस्य षष्टचरणस्य मतदानं स्थले सर्वा: व्यवस्था: अपि कृता:।

निर्वाचनाभियान्

अन्तिम सप्तम चरणात्मकीय लोकसभा-निर्वाचनार्थं प्रचाराभियानं प्रचल्यते। दलीय-प्रमुखा: राजनेतार: स्वीय-दलं विजेतुं कृतसंकल्पा: दृरीदृश्यन्ते। अस्मिन् सप्तम्-चरणीय मतदानाय सप्त-पञ्चाशत् संसदीय-विधानसभाक्षेत्रार्थं मतदानं भविष्यति। एतानि मतदानानि सप्त-राज्य, केन्द्रप्रदेशे च भविष्यन्ति। जूनमासे प्रथम-दिनांके मतदानं भविष्यति। निर्वाचन-प्राङ्गणे च आहत्य चतुरधिक-नवशत-प्रत्याशिन: वर्तन्ते। प्रधानमन्त्री भारतीयजनतापार्टीति दलस्य प्रमुखश्च श्री नरेन्द्रमोदी पाटलिपुत्रे, कर्णाटक-संसदीय-विधानसभाक्षेत्रेषु च जनसभा: सम्बोधयति। आकाशवाणी-वार्ताहरेण संसूचितं यत् उत्तरप्रदेश मुख्यमन्त्री वरिष्ठ भारतीय-जनता-पार्टीति दलस्य नेता च योगी-आदित्यनाथ: सीलमपुर-बलिया-चंदौली-क्षेत्रेषु जनसभा: सम्बोधयति। कांग्रेस-सचिवा प्रियंका-गांधी-समाजवादी-दलस्य राष्ट्रिय अध्यक्ष: अखिलेशयादव: अपि गोरखपुरे जनसभा: सम्बोधयति।

मालदीव-रूपेइति

मालदीवदेश: भारतस्य रूपे इत्याख्यस्या: सेवाया: प्रवर्तनाय निश्चितो जात:। अयं पदक्षेप: मालदीवस्य रूफिया इत्यमुं सबलीकरणरूपे दृश्यते। अत्रावधौ प्रवर्तनाय समयसीमा नैव समुद्घोषिता। तत्सम्बद्ध स्थानीय-वार्ता-प्रतिवेदनेषु मालदीवस्य आर्थिक-विकास-व्यापार मन्त्री मोहम्मद-सईद: संसूचयत् यत् केन प्रकारेण भारत-चीनदेशौ स्थानीय-मुद्राणाम् उपयोगं कृत्वा द्विपाक्षिक-व्यापाराय सहमतौ जातौ। अस्योपक्रमस्य उद्देश्यं अमेरिकी-डॉलरमितस्य निर्भरताया: न्यूनीकरणं वर्तते। क्षेत्रीय-वित्तीय-एकीकरणस्य सबलं वर्तते।

ऋतुविभाग:

ऋतुविभागेन प्रतिपादितं यत् बंगाल-प्रदेशस्य पूर्व-मध्य-उपत्यकाया: पार्श्वे अद्य सायं यावत् चक्रवातीय-झञ्झावातस्य आशंका वर्तते। विभागानुसारेण 'रेमल' इति नामधेयकस्य चक्रवातस्य बांग्लादेश-पश्चिम-बंगालस्य तटीय-क्षेत्रं श्व मध्य-रात्रिं यावत् भीषणं रूप-धारणस्य संभावना वर्तते। स्थितिमिदम् आलक्ष्य भीषण-वृष्टे: आशंका अपि विद्यते। ओडिसा-प्रदेशेऽपि भीषणवृष्टे संचेतना प्रसारिता।

पापुआ-न्यू-गिनी

पापुआ-न्यू-गिनी-इत्यस्य उत्तरी-क्षेत्रे समायातेन एकस्मिन् विनाशकारी-भूस्खलेन त्रिशताधिका: जना: मृता: सूच्यन्ते। ह्य: राजधान्यां पोर्ट-मोरस्बी-स्थलात् षड्-किलोमीटर-उत्तर-पश्चिम-प्रान्ते काओकलाम-ग्रामे सञ्जाते भूस्खलनेन सहस्राधिका: गृहाणि ध्वसिंतानि।

## उत्तराखण्ड-गुरुद्वारा हेमकुण्ड

उत्तराखण्डराज्ये चमोली जनपदे स्थितस्य प्रसिद्ध-सिक्ख-तीर्थस्थलस्य गुरुद्वारा-हेमकुण्ड-सहित-इत्याख्यस्य द्वारम् अद्य प्रात: पारम्परिकानुष्ठानेन सह श्रद्धालूनां कृते उद्घाटितम्। हेमकुण्ड-साहिब इत्याख्यस्य समुचित-सुरक्षित-यात्रां सुनिश्चेतुं राज्यप्रशासन-जनपद प्रशासनाभ्यां तीर्थयात्रावधौ व्यापकी व्यवस्था समनुष्ठिता। तीर्थयात्रिणां सुरक्षां सुनिश्त्यि यात्राया: प्रारम्भिकेषु दिवसेषु प्रतिदिनं केवलं पञ्चत्रिंशत्-शतं श्रद्धालव: एव दर्शनाभिलाषिण: भवितुं शक्नुवन्ति।

## अण्डमान-विमान-निरसनं

चेन्नै-अण्डमानयोर्मध्ये एयर-इण्डिया-विमानसेवा आदिनं यावत् स्थगिता। एकस्य वक्तव्यानुसारि चक्रवातस्य रेमल इत्यस्य कारणेन कोलकाता-अण्डमानयोर्मध्ये आन्ध्रत: पोर्टब्लेयरपर्यन्तं सेवा: आगामिनां घोषणां यावत् निरस्ती कृता:। येनहि अनेके यात्रिण: चेन्नै-विमानपत्तन-स्थानके अवरूद्धा: सन्ति।

## अन्ताराष्ट्रिय न्यायालय-इस्राइलदेश:

अन्ताराष्ट्रिय-न्यायालयेन इस्राइलदेश: गाजापट्टिकां निकषा दक्षिणीय-नगरे राफाइत्यत्र विवादास्पद-सैन्याभियानस्य त्वरितमेव रोद्धुम् आदेश: प्रदत्त:। पीठासीन: न्यायाधीश: नवाफ़सलाम: ह्य: कथितवान् यत् न्यायालयद्वारा विगते समये इस्राइलदेशाय एतस्मिन् संशोधनाय पदक्षेपोत्थापनास्य आदेशानन्तरमेव गजापट्टिकायां स्थिति: प्रतिकूला जाता। इस्राइलदेशेन न्यायालयस्य एष: निर्णय: निरस्तीकृत:। संकेतोऽपि प्रदत: यत् असौ अस्य संचालनस्य रोधनाय कस्यापि आदेशस्य अवहेलनां नैव करिष्यति। इस्राइलेन उक्तं यत् गाजाक्षेत्रे तस्य सैन्याक्रमणं अन्ताराष्ट्रियविधे: अनुसारमेवासीत्।

## पाकिस्तान-तापतरंग:

पाकिस्तान-देशे सहस्राधिक-मात्रायां ऊष्ण-लहर्य्या: कारणात् बहव: जना: दुष्प्रभाविता: जाता:। पीडिता: जना: चिकित्सालयेषु उपचाराधीना: वर्तन्ते। एतादृशा: स्थितय: आगामिषु केषुचित् दिवसेषु दक्षिण-प्रान्तेषु प्रवर्तन्ते एव इति सम्भाव्यते।

## धनुर्विद्या-प्रतियोगिता

दक्षिण-कोरिया-देशे धनुर्विद्या-विश्व-चषक-प्रतियोगिताया: द्वितीय-चरणे भारतीय-महिला-दलेन स्वर्ण-पदकं विजितम्।

## बैडमिंटन

कुआलालांपुर-नगरे मलेशिया-मास्टर्स-बैडमिंटन-प्रतिस्पर्धायाः महिला-एकल-प्रागुपान्त्यचक्रेऽद्य भारतीय-पी.वी.सिंधु, थाईलैण्ड-देशीय-बुसानन-ओं-बेम-रूंग-फानं समं स्पर्धिष्यति।

।। इति वार्ता: ।।